International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(5): 51-53
© 2026 IJMH
www.themultijournal.com
Received: 01-09-2026
Accepted: 22-09-2026
Publish : 24-09-2026

**जगतनारायण बेहेरा**
शोधच्छात्र,
केन्द्रीयसंस्कृतविश्वविद्यालयः ,
भोपालपरिसरः

**सहलेखकः-**
**डॉ.नन्द किशोर तिवारी**
केन्द्रीयसंस्कृतविश्वविद्यालयः ,
भोपालपरिसरः

**Correspondence:**
**जगतनारायण बेहेरा**
शोधच्छात्र,
केन्द्रीयसंस्कृतविश्वविद्यालयः ,
भोपालपरिसरः

# भारतीयभाषासन्दर्भे कातन्त्रव्याकरणस्य महत्वम्

**जगतनारायण बेहेरा, डॉ.नन्द किशोर तिवारी**

**शोधसारः**

अस्यां सृष्टौ पशुपक्षिणः, मानवाश्च स्व चिन्तनशक्तेः, विचारशक्तेश्च येन माध्यमेन,यैर्वा संकेतै स्वमनोभावं प्रकाशयन्ति, सा भाषा इति उच्यते । भाषा इति शब्दः अप्रत्ययान्तात् भाष इति प्रातिपदिकात् टाप् प्रत्यये सति निष्पद्यते । भाष्यते व्यक्तवागरूपेण अभिव्यज्यते इति भाषा [1]। पशुपक्षिणां वाक्,भावाः विविधानि चिह्नानि मानवभाषा च भाषायाम् अर्न्तभूताः भवन्ति । पशुवाक्-भाषा शब्दः पशुपक्षिणां वाक्यानां कृते अपि प्रयुज्यते यथा – श्वान वानरयोः च भाषा, काक पिकयोः च भाषाः। संसारेऽस्मिन् पशुपक्षिणः विविधैःशब्दैः स्वभावं प्रकटयन्ति । अङ्गसंचालनभाषा - हस्तश्चक्षुः शिरःआदीनाम् अङ्गसंचालनेन या भाषा कथ्यते सा अपि भाषा उच्यते । शिरः अग्रे अवनयनेन “आम्” इति वामे दक्षिणे कम्पनेन च “न” इति ज्ञायते तथा चक्षुषचालनं गतिं सूचयन्ति । शरीरस्य गतिविधिश्च अपि भाषाः इति मन्यते । संकेतभाषा- सैनिकाः, नाविकाः,आरक्षकाश्च दूरतः स्व सहचरानां कृते विविधानि संङ्केतानि प्रयोगं कृत्वा वार्तालापं कुर्वन्ति। तथा च कतिपयः अधिकारीणोऽपि स्वभावं प्रकाशनाय ध्वजानां उपयोगं कुर्वन्ति । एषा भाषा संङ्केतभाषा इति मन्यते [2]। मानवीयभाषा- जनाः स्वभावस्य प्रकटनाय या वाणी व्यवह्रियन्ते सा भाषा मानवीयभाषा इति उच्यते। यत् पूर्वोक्ताः प्रथमा त्रिप्रकाराः अपूर्णाः अस्पष्टाः च सन्ति । ते भावनां व्यक्तुं न शक्नुवन्ति परन्तु मानवस्य भाषा भावेन सह मनसि भाषा सुक्ष्माति सुक्ष्मतया प्रकाश्यते । इयं भाषा अस्माकं पूर्वजानाम् अनुभवेन वयं सर्वे जानीमः। मानवाः सामाजिकाःसन्ति ते स्वविचारशक्तेः व्यक्तुं भाषायाः उपयोगं कुर्वन्ति । दृश्यते यत् मानवजातेः विकासानुसारेण भाषायाः अपि विकासो भवति महाकवि दण्डिनोक्तम् काव्यादर्शे –

**इदमन्धतमःकृत्स्नं जायते भुवनत्रयम्**
**यदि शब्दाह्वयं ज्योतिरासंसारान्न दीप्यते**[3] ।।

अर्थात् संसारेऽस्मिन् शब्दस्वरूपज्योति यदि प्रकाशः न भवेत् तर्हि अयं संसारः अन्धकारमयो भविष्यति। भाषा ज्ञानप्रकाशाय शब्दस्य उपयोगी वर्तते । भाषा एका साधना वर्तते अनया भाषया सह मानवाः स्वविचारयोश्च प्रकाशनं करोति, अपि शुद्धभाषा परिस्कृताभाषा कथयितुं व्याकरणज्ञानस्य अपरिहार्यं अस्ति काऽपि भाषा व्याकरणं विना शुद्धा परिस्कृता न भविष्यति तदर्थं भाषायाः शुद्धतानिमित्तं व्याकरणस्य आवश्यकता अस्ति । वेदस्य मुख्याङ्गं कथ्यते व्याकरणं महर्षि पत्तञ्जलिमतानुसारेण व्याकरणस्य अपरं नाम शब्दानुशासनम् अर्थात् – अनुशिष्यते अपशब्देभ्यो विविच्य कथ्यन्ते साधुशब्दाः अनेन इति अनुशासनम् । नाम – सूत्र-वार्तिक- भाष्य-व्याकरणादि रूपं शास्त्रम् । अर्थात् येन अपशब्दात् साधुशब्दान् पृथकं भवेत् तद्ववति अनुशासनं व्याकरणं वा व्याकरणशून्यजनाः साधुशब्दान् प्रयोगकर्तुं असमर्थाः भवन्ति । महर्षिणा भास्कराचार्येण उच्यते यत् –

**योनाम वेदवदनं सदनं हि सम्यक्**
**ब्राह्म्या सवेदमपिवेद किमन्यशास्त्रम्** ।
**यस्मादतःप्रथममेतदधीत्ये विद्वान्**
**शास्त्रान्तरस्य भवति श्रवणेधिकारी** [4]।।

**कूटशब्दाः-**
भारतीयभाषा , कातन्त्रव्याकरणम्, संङ्केतभाषा , मानवीयभाषा , महर्षिदण्डिः , अभिव्यञ्जकभाषा , शब्दस्वरुपज्योति, शब्दानुशासनम् , शास्त्रान्तरम्, भास्कराचार्यः।

**भूमिका –**

अस्माकं भारतवर्षे भाषायाः विविधता दृश्यते। अत्र ७८० तःअधिकाभाषाःशतशः मातृभाषाः च सन्ति । भारतीय संविधानस्य अष्टमनुसुचौ हिन्दी राजभाषारुपेण घोषिता ,बाङ्गला ,मराठी ,तामिल्, तेलुग् संस्कृत च इत्यादिनि २२ प्रमुख भारतीयभाषासु अधिकारिकं स्थानं दतमस्ति। एताः भाषाः मुख्यतया इण्डो-आर्यः,द्राविड् ,एशियाटिक् ,तिब्बती ,बर्मन् भाषापरिवारेषु अन्तर्भवन्ति। हिन्दी भारतस्य राजभाषा अस्ति या १४ सिप्ट-म्वरः१९४९ दिनाङ्के स्वीकृता भारतीयभाषाः मुख्यतयाः चतुर्षु परिवारेषु विभक्ताः सन्ति[5] ।

भारत-आर्यभाषाः-हिन्दीः, वंगला,मराठी,गुजराती,खासी ।
द्रविडभाषाः-तामिल् ,तेलुग, मलयालम्।
अष्ट्रिया एशियाईभाषा-संताली ,हो ,मुण्डरी, खासी।
तिवत्तीवर्मनभाषाः-मणीपुरी , मिजो , आओ,नागः।

अन्याः महत्वपूर्णाः भाषाः हिन्दीभाषायाः अनन्तरं वङ्गला,मराठी ,तेलुगभाषाः च सर्वाधिकं भाष्यन्ते एतासु सर्वासु भाषासु व्याकरणस्य भूमिका अधिकं वर्तते व्याकरणं विना भाषायाः शुद्धता संस्कारिता च न अर्हति । महर्षि पाणिनिना पाणिनीयशिक्षायां मानवस्य वागयन्त्रमाध्यमेन कथं विविधाःवर्णाःध्वनिना सह उच्चारितं भूत्वा भाषायाः उत्पत्तिं कारयन्ति। तद्विषये वर्णितम्-

**आत्मा बुद्धया समेत्यर्थान् , मनो युङ्क्ते विवक्षया**
**मनः कायाग्निमहन्ति स प्रेरयति मारुतम् ।**
**मारुतस्तूरसि चरन् मन्द्र जनयते स्वरम्**
**प्रातः सवनं योगं ते छन्दो गायत्र्यमाश्रितम्** [6]**।।**

शरीरस्थः आत्मा बुद्धया सह अर्थान् वाह्यान् सम्यक् अवगमनार्थं यदा शब्दान् उच्चारयति तदा वक्तुमिच्छया मनो युङ्क्ते तत् मनःनियुक्तं सन् शरीराग्निम् आभिमुख्येन आहन्ति । सः अग्निः अभिहितः सन् मारुतं वायुं प्रेरयति मारुतस्तु उरसि चरन् हृदेशो परिभ्रमन् मन्द्रं स्वरं उत्पादयति तदा एव वर्णाः बहिः आगच्छन्ति ।

**विषयवस्तुविश्लेषणम् –**

आन्ध्रदेशीयराजा सातवाहनः एकदा स्वमहिषीभिः साकं जलक्रीडा निमग्नः। तस्मिन् अवसरे विदूषी राज्ञी राजानामाह “मोदकं देही देवः” राजा जले तस्यै वहूनि मोदकानि दतवान् । राज्ञी तस्य व्याकरणानभिज्ञतां ज्ञात्वा राजानामुपरि अहसत् ,तेन लज्जितो भूत्वा राजा व्याकरणाध्ययनाय संकल्पं कृतवान् । तस्य संक्ल्पं ज्ञात्वा आचार्यः शर्ववर्मा षाणमासिकावधिकाले तं व्याकरणं पाठयति स्म । तदनन्तरं कार्तिकेयं तोषयित्वा तत्सकाशात् सिद्धो वर्णसमाम्नाय इति सूत्रोपदेश रूपं व्याकरणमिदं बोधयति स्म । अस्य व्याकरणस्य विविधानि नामानि दृश्यन्ते यथा – कातन्त्रं ,कलापं ,कौमारम् , शार्ववर्मिकम् इत्यादीनि कार्तिकेयं आराध्यं आचार्य शर्ववर्मणा प्रोकतंमिदं व्याकरणम् तस्मादस्य शार्ववर्मिकमिति नामधेयमस्ति[7] । आचार्यः शशिदेवेनोक्तम् व्याख्यानप्रक्रियानुसारं वैदिकानाम् ,धनिनाम् ,यूनाम्,वणिजाम् ,लोकयात्रादिकार्येषु शब्द-साधुत्व प्रक्रियापरिज्ञानाय कलापस्य रचना संजाता । कथ्यते-

**छान्दसां स्वल्पमतयः शास्त्रान्तररताश्च ये ।**
**ईश्वरा वाच्यनिरतास्तथालस्ययुताश्च ये ।।**
**वणिजस्तृष्णादिसंसक्ता लोकयात्रादिषु स्थिताः।**
**तेषां क्षिप्रं प्रवोधार्थमनेकार्थं कलापकम् ।।**

आचार्येण सर्ववर्मण रचितं कातन्त्रव्याकरणं संस्कृतव्याकरणस्य सरलं संक्षिप्तं अवगम्यमानं परम्परा च आस्ति अथवा लोकसंस्कृतस्य द्रुतशिक्षणाय निर्मितमासीत् । पाणिनीय व्याकरणपेक्षया सरलत्वात् प्राचीनभारते सामान्यजनानां व्याकरणं पश्चात् बौद्धविदुषां च मध्ये इदं अत्यन्तं लोकप्रियमासीत्, भारतीयभाषाशास्त्रस्य संस्कृत-व्याकरणस्य च परम्परायां कातन्त्रव्याकरणं कौमारम् अथवा कलापव्याकरणम् इति अपि प्रसिद्धम् अत्यन्तं महत्वपूर्णं अस्ति[8] । अस्य व्याकरणस्य मुख्यस्थानानि यथा-

**संस्कृतस्य सरलीकरणम् –**

पाणीनिना प्रणिता अष्टाध्यायी तदपेक्षया संस्कृतव्याकरणस्य सरलं, सुगमं , वोधगमं अपि च राज्ञां संस्कृतभाषा शिक्षणार्थं आचार्यः शर्ववर्मा कातन्त्रव्यकरणं विरचितवान् । अस्य व्याकरणस्य मुख्य प्रयोजनमासीत् अल्पकाले तु संस्कृतभाषायाः शिक्षणम् । व्याकरण-मिदं संस्कृतशिक्षणस्य उपायमपि प्रदर्शयति ।

**लोकभाषासु प्रभावः**

व्याकरणमिदं केवलं संस्कृते एव सीमितं नासीत् । पाली- प्राकृत-अपभ्रंशः-भाषासु अस्य व्याकरणस्य महनीयता दृश्यते । भारतीय उपमहाद्वीपस्य प्रादेशिकभाषाणां कृते व्याकरणविकासार्थं इदं आधाररुपेण कार्यं कुर्वन्नस्ति[9] ।

**शिक्षायाः सरलीकरणम् –**

प्रचीनकाले शिक्षाक्षेत्रे ये छात्राः पण्डिताः विद्वांसःच भवितुं न ऐच्छन् अपितु व्यवहारिक प्रयोगाय संस्कृतस्य ज्ञानं प्राप्तुम् इच्छन् तादृश छात्राणां कृते विशेषतया कातन्त्रव्याकरणम् उपयोगी आसीत्।

**क्षेत्रीयभाषायाः विकासः**

बङ्गलकाश्मीरी राज्येषु भाषाणां प्रारम्भिकव्याकरणेषु कातन्त्रस्य स्पष्टं प्रभावो अस्ति । तिब्बती, सिंहली आदि देशे भारताद् वहिःअपि कातन्त्रव्याकरणस्य उपयोगं जनाः कुर्वन्ति, मुख्यतया तिब्बतीव्याकरणस्य निर्माणाय व्याकरणमिदं प्रसिद्धं वर्तते । श्रीलङ्कादेशे जनाः कथोपोकथनाय अस्य व्याकरणस्य प्रयोगं कुर्वन्ति ।

**धार्मिकग्रन्थस्य व्याख्या**

जैनबौधयोः-विद्वांसः पाणिनीय व्याकरणात्परं कातन्त्रव्याकरणं प्रति प्राधान्यं दतवन्तः यतोहि तत् विविधं सम्प्रदायं प्रति सुकरमासीत् । एतस्मिनकाले सर्वे धार्मिकाः ग्रन्थाः संस्कृतभाषायां रचिता आसन् ।

**लोकव्यवहारंसमादारकृतं वैशिष्ट्यम्**

कातन्त्रव्याकरणे लोकव्यवहारः पाणिनीयादधिकं दृश्यते तद् यथा “सिद्धो वर्णसमाम्नायः”१/१/१ इति प्रथमेन सूत्रेण वर्णानां पाठक्रमो लोकप्रसिद्धः एव गृह्यते । अत्र चतुर्दशस्वरेषु दीर्घस्वराऽपि पठ्यन्ते, परन्तु पणिनीये दीर्घवर्णाःनैव सन्ति तत्र तु कृत्रिमता दृश्यते ए,ओ,ऐ,औ इति । ए,ऐ ,ओ,औ इति कातन्त्रे तु लोकप्रचलितः पाठः एव वर्तते । कातन्त्रे स्वरवर्णानन्तरमनुस्वार- विसर्ग- जिह्वामूलीय-उपध्मानीया अपि पठिताः, अत एव ते योगवाहा सन्ति । पाणिनीये वर्णसमाम्नाये श,ष,स,ह इत्येतान् हलवर्णान् पठ्यन्ते । तत्रापि च ह कारस्य द्विः पाठौ व्याख्यनगम्यः । लोकव्यवहारसाधकमपरमप्येकं सूत्रं वर्तते “लोकपचाराद् ग्रहणसिद्धिः”१/१/२३ इति गृह्यतेऽर्थो-अनेनेति ग्रहणः शब्दः। केषां शब्दानाम् ? वैदिकानां लौकिकानाञ्च कलापचन्द्रकारेण कविराजसुषेणविद्याभूषणेनोक्तं[10] -

वा शब्दैश्चापिशब्दैर्वा शब्दानां ( सूत्राणाम् ) चालनैस्तथा ।
एभिर्येऽत्र न सिध्यन्ति ते साध्या लोकसम्मताः।।

**कातन्त्रव्याकरणस्य महत्वम्**

कातन्त्रव्याकरण विषये ये पण्डिताः,विद्वांसः स्वमतं प्रकाशयन्ति ते सर्वेऽपि संस्कृतभाषा सामान्यजनान् शिक्षणाय अध्ययनाय अध्यापनाय च व्याकरणमिदम् अत्यन्तं सुकरम् इति कथयन्ति । छन्दशास्त्रस्य अध्येता स्वल्पमतिसम्पन्नव्यक्तिः, विविधशास्त्रस्य अध्येता, शासकवर्गस्य जनः, व्यापारवाणिज्ये, कृष्यादि कर्मक्षेत्रे कार्यं कुर्वन्तः एतत् व्याकरणं तेषां कृते व्यवहारोपयोगी अस्ति । ते सर्वे कातन्त्रव्यकरणेन संस्कृतभाषायाः ज्ञानं सरलतया शीघ्रं च प्राप्तुं शक्नुवन्ति । इदं व्याकरणं विविधक्षेत्रेषु उपयोगिनो शब्दान् शिक्षितुं सहाय्यं करोति [11]।

ये मानवाः प्राकृतभाषया संस्कृतभाषां ज्ञातुं इच्छन्ति तेभ्यः एतत् व्याकरणं विशेषतया सहायकमस्ति । काच्चायन पालिव्याकरणञ्च कातन्त्रव्याकरणस्य नियमैः प्रभावितमस्ति। तथा च कातन्त्रव्याकरणस्य अपर स्वरूपं वर्तते ऐन्द्रव्याकरणम् , ऐन्द्रतामिलव्याकरणयोः समानता अपि दृश्यते। । कातन्त्रव्याकरणं विशुद्धं लौकिकञ्च। अस्य निर्माणसमये पाणिनीय व्याकरणे वौदिकभाषासम्बद्धा देवेभिः इत्यादयः व्यजनाःपूर्वमेव लौकिकमाधारमपि प्राप्तवन्तः। यद्यपि पाणिनीयव्याकरणवत् कातन्त्रव्याकरणं व्यवस्थितं पूर्णं च नैवास्ति इति स्पष्टं तथापि वर्तमानवातावरणे संस्कृतस्य अध्ययनार्थं कातन्त्रव्याकरणं उपयोगी सिद्धं भवितुम् अर्हति एतद्द्वरा शिक्षकाः अष्टाध्याय्याः क्लिष्टव्यवस्थायाः मुक्ता भूत्वा सरलरूपेण संस्कृतं शिक्षयितुं शक्नुवन्ति[12] । अस्य युगस्य भाषाशिक्षणविशेषज्ञाः संस्कृतशास्त्रीयभाषा पुस्तकालयभाषा च इति स्वीकृतवन्तः। प्राचीनसाहित्यस्य अध्यारोहणं ज्ञानं अनुवादद्वारा प्राप्तुं शक्यते इति तेषां मतम् । साहित्यद्वारा अपि साध्यं कर्तुं शक्यते । अनेन प्रकारेण स्पष्टतया ज्ञायते यत् दैनन्दिनजीवने संस्कृतस्य उपयोगिताम् अङ्गीकृत्य अपि ते एतादृशं संस्कृतस्य अध्ययनाय प्रोत्साहयितुं न इछन्ति। एवं सति कातन्त्रव्याकरणस्य उपयोगिता बिषये वक्तुं शक्यते यत् तस्य नियमाः उपनियमाः सूत्राणि उदाहरणानि च सामान्य जनानां व्यावहारिक जीवनेन सह सम्बद्धाः सन्ति । अतः पाणिनीयव्याकरणस्य अध्ययनं यद्यपि उच्चस्तरस्य उपयोगी भवति तथापि सामान्यस्तरस्य च्छात्राणां कृते कठिनं वर्तते, एतादृश परिस्थितौ कातन्त्रव्याकरणस्य तुल्यकालिकरूपेण अधिकं महत्वमस्ति। भारतस्य प्रमुखदक्षिणभाषासु तामिलभाषायाः व्याकरणं भाषाविदः आर्यभाषापरिवारात् भिन्नं स्वीकुर्वन्ति । परन्तु तामिल् भाषायाः व्याकरणं कातन्त्रे तु समाविष्टा अस्ति, एतत् पूर्वमेव उक्तमस्ति एवं भाषिकतत्वस्य तत्वानि अपि अस्मिन् व्याकरणे निहितानि सन्ति ।

**सारांशः-**

जगतः सर्वाणि कार्याणि भाषया संचलितानि भवन्ति। ज्ञानविज्ञानस्य धर्मदर्शनस्य आचारविचारस्य च मूलाधारा भाषा एव वर्तते । भाषा हि लोकस्य सर्वश्रेष्ठनिधिः अस्ति । भाषां विना जनाः किमपि च कार्यं कर्तुं न शक्नुवन्ति । मानवानां विचाराः भाषया एव प्रसरन्ति यथा प्राणिनां कृते पृथ्विजलवायु गगनाग्निनां आवश्यकता सर्वैः स्विक्रियते तथैव भाषयाः अपि प्रयोजनं मानवानां कृते वर्तते । उक्तं च-

**न सोऽस्ति प्रत्ययो लोके यश्शद्वानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वशब्देन भासते ।।**

भारतीयभाषापरम्परायां कठिनतः सरलं प्रति संक्रमणे कातन्त्रव्याकरणस्य भूमिका महत्वपूर्णं अस्ति येन समाजस्य विभिन्नवर्गेषु प्रदेशेषु च संस्कृतस्य भाषायाः प्रसार प्रचारञ्च अभवत्।

**सन्दर्भग्रन्थसूची-**

1-द्विवेदी, जानकीप्रसाद,डॉ- (1997) कातन्त्रव्याकरणम् ,प्रथमो भागः,सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः,वारणासी-221002 ।
2-शतपथी, प्रो. हरेकृष्ण, (2015) संस्कृतसाहित्यर इतिहास, किताबमहल,कटक-753003 ।
3-मिश्रः, डॉ. रामसागरः.(1991) कातन्त्रव्याकरणम् शिष्याहितान्यासः, प्रभाप्रकाशनम्,दिल्ली-110053 ।
4-द्विवेदी,डॉ. कपिलदेव (2016) भाषाविज्ञान एवं भाषाशास्त्र, विश्वविद्यालयप्रकाशन ,विशालाक्षी भवन,वाराणसी-221001।
5-खण्डूडी, आचार्य ,पं.सत्यनारायण(2019) वाक्यपदीयम् (ब्रह्मकाण्डम्), चौखम्बा कृष्णदास अकादमी, वाराणसी -221001।
6-मीमांसक,आचार्य श्री युधिष्ठिर,(2006) संस्कृत व्याकरण शास्त्र का इतिहास, चौखम्बा पब्लिशर्स,गोकुलभवन,वाराणसी-221001।
7-शर्मा,बालकृष्णः पाणिनीयशिक्षा, प्रकाशकः श्री निवास रथः,विक्रमसंवत् 2050 ।
8-झा,डॉ. उदय शंकर,( 2019) संस्कृतशिक्षणम् , चौखम्बा सुरभारती प्रकाशन,दरियागंज ,नई दिल्ली 110002 ।

**अन्तर्जालसङ्केत सूची-**

www.googlebooks.com
www.archive.com
www.sanskrit.com

**पाद टिप्पणी -**

1. संस्कृतशिक्षणम् ।
2. भाषाविज्ञान एवं भाषाशास्त्र ।
3. काव्यादर्श ।
4. संस्कृतसाहित्यर इतिहास ।
5. भाषाविज्ञान एवं भाषाशास्त्र ।
6. पाणिनीयशिक्षा ।
7. कातन्त्रव्याकरणम् (प्रथमो भागः) ।
8. कातन्त्रव्याकरणम् (प्रथमो भागः) ।
9. www,google.com ।
10. कातन्त्रव्याकरणम् (प्रथमो भागः) ।
11. कातन्त्रव्याकरनम् शिष्याहितान्यासः ।
12. संस्कृत व्याकरण शास्त्र का इतिहास ।